इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

दिनाङ्कः - 11.11.2024 सायम्  - 06:20

मुख्यवार्ताः

- प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रोक्तं यत् भारतीय-युवकानां क्षमतायाः विषये सम्पूर्णः विश्वः आकर्षितः अस्ति गुजरातस्य वड्ताल-नगरे श्रीस्वामिनारायण-मन्दिरस्य द्विशततम-वर्षपूर्त्यर्थं आयोजिते कार्यक्रमे सः सम्बोधयन् आसीत्।
- न्यायमूर्तिः सञ्जीव-खन्ना अद्य भारतस्य एकपंचाशततमस्य  मुख्यन्यायाधीशस्य शपथवचनं स्वीकृतवान्।
- झार्खण्ड-राज्ये विधानसभानिर्वाचनस्य प्रथमस्य चरणस्य प्रचारः अद्य  समाप्तः अभवत्।
- केन्द्रेण छत्तीसगढ-ओडिशा-पश्चिमबंगाल-राज्याणां कृते षड्विंशत्यधिक-सप्तशत-कोटिरूप्यकाणां तिस्रः परियोजनाः स्वीकृताः सन्ति।
- रूसेन अमेरिकायां राष्ट्रपति-निर्वाचनस्य अनन्तरं  डोनाल्ड-ट्रम्पस्य व्लादिमीर-पुतिनस्य च मध्ये दूरभाषमाध्यमेन वर्तायाः खण्डनं कृतम्।
- संयुक्तराष्ट्र-वार्षिक-जलवायु-परिवर्तन-सम्मेलनम्-cop.-उनत्रिंशत् अद्य अजरबैजानदेशस्य बाकु-नगरे आरभत्।
- अन्ताराष्ट्रिय-चलच्चित्र-महोत्सवे सत्यजीत रे लाइफटाइम अचीवमेंट इति पुरस्कारः ऑस्ट्रेलियायाः प्रसिद्ध-चलच्चित्र-निर्मात्रे  फिलिप-नॉयस् इत्यस्मै प्रदास्यते।

प्रधानमन्त्री-स्वामिनारायणमन्दिरम्

प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रोक्तं यत् भारतीय-युवकानां क्षमतायाः विषये सम्पूर्णः विश्वः आकर्षितः अस्ति इति। सः अवदत् यत् अद्यत्वे विश्वस्य अधिकांशाः नेतारः स्वदेशे कार्यार्थम् कुशलजनशक्तियुतान् भारतीय-युवान् अपेक्षन्ते इति। श्रीमोदी अद्य प्रातः गुजरातस्य वड्ताल-नगरे श्रीस्वामिनारायण-मन्दिरस्य द्विशततम-वर्षपूर्त्यर्थं आयोजिते कार्यक्रमे सम्बोधयन् आसीत्। सः अवदत् यत् भारतस्य यूनां कृते वैश्विकाग्रहः इतोऽपि वर्धमानः भविष्यति।

सः अवदत् यत्, भगवता स्वामिनारायणेन द्विशतं वर्षेभ्यः पूर्वं स्थापितस्य वड्डल्-धाम् इत्यस्य आध्यात्मिक-चेतनां जनाः जीवितवन्तः। श्रीमोदी अवदत् यत् अयं अवसरः भारतीयसंस्कृतेः सार्वकालिकप्रवाहस्य प्रमाणम् अस्ति। प्रधानमन्त्रिणा देशवासिनोः विकसितभारतस्य सङ्कल्पं स्वीकृत्य आगामि पंचविंशति-वर्षेषु तत् साधयितुं सक्रियरूपेण योगदानं दातुम् आग्रहः कृतः। सः नूतनावधेः कुशल-कर्मचारिणां विकासाय सर्वकारस्य महत्त्वपूर्णान् प्रयत्नान् उल्लिखितवान्। प्रधानमंत्रीः शिक्षायाः, कौशलविकासस्य, व्यसनमुक्तेः च क्षेत्रेषु स्वामिनारायणपन्थस्य उल्लेखनीयस्य योगदानस्य प्रशंसाम् अकरोत् तथा च आध्यात्मिकतायाः आधुनिकतायाः सम्मिश्रणेन नव-समाजस्य निर्माणम् अकरोत्। स्वस्य सर्वकारस्य 'विकास भी विरासत भी' इत्यस्य मूलदर्शनं पुनरावर्तयन्, सः अवदत् यत्, कः अपि देशः स्वपरम्परायाः संरक्षणम् विना प्रगतिं कर्तुं न शक्नोति इति। श्रीमोदी भारतस्य जनानां आध्यात्मिकनेतृणां च आह्वानम् अकरोत् यत् ते देशस्य समृद्धायाः परम्परायाः विषये गर्वं कुर्वन्तु, तथा च तत् आगामि-समाजं प्रति प्राप्नुयात् इति सुनिश्चितं कुर्युः। मन्दिरस्य द्विशत-वर्षाणि पूरयितुं उत्सवेषु भागं ग्रहीतुं देशविदेशात् सहस्रशः तीर्थयात्रिकाः गुजरातस्य खेडा-मण्डलस्य वड्ताल्-नगरं प्राप्तवन्तः। अस्मिन् मासे सप्त दिनाङ्के पोथी-यात्रया, कलश-यात्रया च सह समारभ्य एषः उत्सवः नवम्बरमासस्य पंचदश-दिनाङ्कपर्यन्तं प्रचलति।

<u>विराम:</u>

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटले <u>www.newsonair.gov</u>.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।

<u>संजीवखन्ना-मुख्यम्यायाधीशः</u>

न्यायमूर्तिः सञ्जीव-खन्ना अद्य भारतस्य एकपंचाशततमस्य मुख्यन्यायाधीशस्य शपथवचनं स्वीकृतवान्। राष्ट्रपतिः द्रौपदीमुर्मुवर्या राष्ट्रपतिभवने एकस्मिन् समारोहे न्यायमूर्ति खन्ना इत्यस्मै पदस्य शपथवचनं प्रायच्छत्। संजीवखन्ना न्यायाधीशत्वेन D.Y. चन्द्रचूडः इत्यस्य उत्तराधिकारी जातः, यः ह्यः कार्यालयात् निवृत्तः अभवत्। उपराष्ट्रपतिः जगदीप् धनखड, प्रधानमन्त्री नरेन्द्रमोदी, अनेके केन्द्रीयमन्त्रिणः, सर्वोच्चन्यायालयस्य न्यायाधीशाः च अन्यैः सह अस्मिन् समारोहे भागम् अगृह्णन्।

झारखण्ड-विधासभानिर्वाचनप्रचारः

झार्खण्ड-राज्ये विधानसभानिर्वाचनस्य प्रथमस्य चरणस्य प्रचारः अद्य समाप्तः अभवत्। अस्मिन् चरणस्य मतदानं अस्मिन् मासे त्रयोदशदिनाङ्के त्रिचत्वारिंशत्-निर्वाचनक्षेत्रेषु भविष्यति। दल-प्रचारकाः स्वपक्षस्य अभ्यर्थिनां कृते मतदातृन् आकर्षयितुम् अन्तिमप्रयासान् कृतवन्तः। भाजपा-दलस्य वरिष्ठः नेता प्रधानमन्त्री च नरेन्द्रमोदी अद्य झार्खण्ड-राज्ये भाजपा-कार्यकर्तृभिः सह 'मेरा बूथ् सबसे मजबूत्' इति अभियानस्य अन्तर्गतं वार्तालापम् अकरोत्। झार्खण्ड-राज्यस्य द्रुतविकासाय द्वि-यन्त्र-सर्वकारस्य आवश्यकता अस्ति इति श्रीमोदी अवदत्। दलस्य संघटनात्मक-क्षमतायाः उल्लेखं कुर्वन् प्रधानमन्त्री अवदत् यत् भाजपा-दलं स्वयमेव सङ्घटनाधारेण विनिर्मितम् अस्ति, अतः तस्य निर्वाचनपद्धतिः सङ्घटनस्य कार्यकर्तृणां च आधारेण भवति। अपरत्र, जे. एम्. एम्.-दलस्य वरिष्ठः नेता मुख्यमन्त्री च हेमन्त-सोरेनः इत्यनेन आरोपः प्रख्यापितः यत् एन्. डी. ए-दलस्य कार्यकाले झारखण्डस्य हितानाम् अपि उपेक्षा सञ्जाता। पलामु-नगरस्य हुसैनाबाद-नगरे निर्वाचन-सभाम् सम्बोधयन्, सोरेनः इति कथयन् आरोपं प्रख्यापितवान् यत् एन- डी. ए-सर्वकारः राज्ये बहूनि महत्त्वाकांक्षी-परियोजनाः स्थगयति।

अमितशाहः-परियोजनाः

केन्द्रीयगृहमन्त्रिणः अमितशाहस्य अध्यक्षतायाम् एकया उच्चस्तरीय-समित्या छत्तीसगढ-ओडिशा-पश्चिमबंगाल-राज्याणां कृते न्यूनातिन्यूनं षड्विंशत्यधिक-सप्तशत-कोटिरूप्यकाणां तिस्रः परियोजनाः स्वीकृताः सन्ति। एतेषां परियोजनानां अनुमोदनं राज्येषु अग्निशमन-सेवानां विस्ताराय, आधुनिकीकरणाय च कृतमस्ति। गृह-मन्त्रालयेन एकस्मिन् वक्तव्ये प्रोक्तं यत् समित्या छत्तीसगढ़ाय न्यूनातिन्यूनं अष्टचत्वारिंशदधिक-एकशत-कोटिरुप्यकाणि, ओडिशायै एकाधिक-द्विशतकोटिरूप्यकाणि, पश्चिम-बंगालाय च न्यूनातिन्यूनं सप्तत्युत्तर-त्रिशत-कोटिरूप्यकाणि स्वीकृतानि सन्ति।

डोनाल्डः-पुतिनः

रूसेन अद्य तासां सूचनानां खण्डनं कृतं यासु प्रोक्तम् आसीत् यत् अमेरिकायां विगतसप्ताहस्य राष्ट्रपति-निर्वाचने रिपब्लिकन-प्रत्याशिनः विजयानन्तरं निर्वाचितस्य राष्ट्रपतिनः डोनाल्ड-ट्रम्पस्य रूसस्य राष्ट्रपतिनः व्लादिमीर-पुतिनस्य च मध्ये दूरभाषमाध्यमेन सम्वादः सञ्जातः। मॉस्को-नगरे एकं दैनिक-वार्ताहरं कथयन्, क्रेमलिनस्य प्रवक्ता दिमित्री-पेसकोवः सम्वादस्य खण्डनं कुर्वन् प्रोक्तवान् यत् एतादृशः कः अपि सम्वादः द्वयोर्मध्ये नाभवत्। सः प्रोक्तवान् यत् सूचनाप्रपत्रं पूर्णरूपेण कपोलकल्पितम् आसीत् यस्मिन् सर्वमपि तथ्यम् असत्यम् आसीत्। अवधेयं यत् इतः पूर्वं विविधैः समाचारसंस्थानैः प्रोक्तम् आसीत् यत् डॉनेल्ट-ट्रमपस्य पुतिनस्य च मध्ये दूरभाषमाध्यमेन वार्ता अभवत्।

कॉप्-उनत्रिंशत्

संयुक्तराष्ट्र-वार्षिक-जलवायु-परिवर्तन-सम्मेलनम्-cop.-उनत्रिंशत् अद्य अजरबैजानदेशस्य बाकु-नगरे आरभत्। सप्ताहद्वयस्य अस्य कार्यक्रमस्य माध्यमेन जलवायु-परिवर्तनेन प्रभावितानां सम्वेदनशील-देशानां च कृते जलवायु-वित्तस्य नूतनलक्ष्यानि साधयितुं ध्यानं केन्द्रितं करिष्यते। वैश्विक-जलवायु-वित्त-संरचनायाः निर्माणे भारतं महत्त्वपूर्णां भूमिकां निरवहत्। बाकु-नगरे, भारतं जलवायु-वित्तस्य नूतनं लक्ष्यं अन्विष्यति, यत् नवाधिक-द्विसहस्रतमे वर्षे स्थापितस्य शत-बिलियन्-डालर्-मूल्यस्य पुरातन-वार्षिक-लक्ष्यात् बह्वधिकं भविष्यति।

भारतीयान्तर्राष्ट्रिय-चलच्चित्र-महोत्सवः

भारतीयान्तर्राष्ट्रिय-चलच्चित्र-महोत्सवः आईएफएफआई इत्यस्य पञ्चपञ्चाशत्तमं संस्करणं नवम्बर-मासस्य विंशति-दिनाङ्कात् गोवायां समारप्स्यते। अद्य नवदिल्ल्यां आयोजिते एकस्मिन् वार्ताहरसम्मेलने सूचनाप्रसारण राज्यमन्त्री डॉ एल् मुरुगनः प्रोक्तवान् यत् आईएफएफआई इत्यस्मै चलच्चित्रनिर्मातृभिः दर्शकैः च अत्यधिकं समर्थनं प्राप्यते। डॉ. मुरुगनः प्रोक्तवान् यत् एषः महोत्सवः बृहत्तमेषु चलच्चित्रमहोत्सेषु एकः अस्ति। सः प्रोक्तवान् यत् भारतीयचलच्चित्रेण देशस्य अर्थव्यवस्थायां महत्वपूर्णा भूमिका निर्वहते। सूचनाप्रसारण-मंत्रालयस्य सचिवः संजय-जाजू अकथयत् यत् अस्मिन् वर्षे युवचलचित्रनिर्मातृषु विशिष्टं ध्यानं प्रदास्यते। सः प्रोक्तवान् यत् नवीनप्रतिभायै प्रोत्साहनं प्रदातु एकः सर्वश्रेष्ठ-भारतनवोदितपुरस्कारः इति नूतनपुरस्कारः अपि समारप्स्यते। श्रीजाजू अकथयत्

यत्  अस्मिन् वर्षे आस्ट्रेलिया महोत्सवस्य केन्द्रम् अस्ति अपि च महोत्सवस्य समारम्भः आस्ट्रेलियायाः चलच्चित्रं बटर-मैन इत्यनेन सह भविष्यति। सः इदमपि प्रोक्तवान् यत् सत्यजीत रे लाइफटाइम अचीवमेंट इति पुरस्कारः ऑस्ट्रेलियायाः प्रसिद्ध-चलच्चित्र-निर्मात्रे  फिलिप-नॉयस् इत्यस्मै प्रदास्यते। श्रीजाजू प्रोक्तवान् यत् अस्मिन् वर्षे चलच्चित्रमहोत्सवे एकाधिकशतं देशानां षट्सप्तत्यधिक-षट्-शताधिकैक-सहस्रं प्रविष्टयः प्राप्ताः सन्ति। महोत्सवाय एकशीति-देशानां अशीत्यधिकैकशततः अधिकानां  अंतर्राष्ट्रिय-चलच्चित्राणां  चयनं कृतमस्ति।

<u>जयशङ्करः-रूसः</u>

विदेशमन्त्री डा. एस्. जयशङ्करः भारत-रशिया-देशयोः मध्ये व्यापार-सम्बन्धस्य सुदृढीकरणस्य आवश्यकतायाः विषये अवधानं दत्तवान्। सः मुम्बय्यां भारत-रशिया-व्यापार-मञ्चे मुख्य भाषणम् प्रायच्छत्। अस्मिन् अवसरे रशियादेशस्य प्रथमः उपप्रधानमन्त्री डेनिस् मन्टुरोव् इत्येषः अन्यैः महानुभावैः सह उपस्थितः आसीत्। डॉ. जयशङ्करः अवदत् यत् वर्तमानकाले उभयदेशयोः मध्ये षट्-षष्टि-बिलियन्-डालर्-मूल्यस्य व्यापारः भवति तथा च त्रिंशदधिक-द्विसहस्रतमाब्दं यावत्  शत- बिलियन्-डालर्-मितस्य लक्ष्यम् अतिक्रामयिष्यति।

।।इति वार्ता:।।